International Journal of Sanskrit Research 2025; 11(5): 222-224

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(5): 222-224
© 2025 IJSR
www.anantaajournal.com
Received: 12-09-2025
Accepted: 11-10-2025

**Sourav Dutta**
Department of Sanskrit, Research Scholar, Rabindra Bharati University, Kolkata, West Bengal, India

**Corresponding Author:**
**Sourav Dutta**
Department of Sanskrit, Research Scholar, Rabindra Bharati University, Kolkata, West Bengal, India

# अभिनयदर्पणमतेन नृत्यस्वरूपनिरूपणम्

**Sourav Dutta**

**सारांश**

वैशिष्ट्यसम्पन्नम् अङ्गसञ्चरणं यत् ताल-लय-सङ्गीत-सहयोगेन क्रियते तत् नृत्यमित्युच्यते । नृत्यविषये उपलब्धेन साहित्यिक-प्रत्नतात्विक-निदर्शनसमूहेन मन्यते सिन्धुसभ्यतायाः वैदिक-वैदिकोत्तर-कालेऽपि नृत्यचर्चा मानवसमाजे सुप्रचलिता आसीत्, अधुनापि एतस्य चर्चा सम्यकरूपेण दृश्यते। इदानीं भारतवर्षे मुख्यतया अष्टविधशास्त्रीयनृत्यानि दृश्यन्ते-भरतनाट्यं-कत्थक-ओडिषी-सत्रीय-मणिपुरी-कुचिपुडि-कथाकलि-मोहिनीयाट्टं चेति। एतानि नृत्यानि परस्परं भिन्नं यतः भिन्न-भिन्न-शास्त्रीयग्रन्थान् अनुसरणं क्रियन्ते। अतः भरतनाट्यम् इति नृत्यस्य वैशिष्ट्यं कथाकलि-नृत्यस्य वैशिष्ट्यात् भिन्नमेव। यद्यपि एतेषां साधारणं वैशिष्ट्यम् एतानि सर्वाणि भारतीय-शास्त्रीय-नृत्यमेव। अतः स्वाभाविकतया प्रश्नः उद्भवति-नृत्यस्य लक्षणं किम् ? किं संस्कृतसाहित्ये नृत्यस्य कापि परिभाषा अस्ति या सर्वविधनृत्यस्य मूलवैशिष्ट्यं प्रतिपादयति? प्रस्तावितगवेषणा-सन्दर्भे वस्तुतः एतस्मिन्नेव विषये विस्तारितविवरणं प्रदत्तम्।

**शब्द-कुंजी :** नृत्यम्, भारतीयनृत्यम्, भारतीयशास्त्रीयनृत्यम्, अभिनयः, नाट्यम्, रसः।

**प्रस्तावना**

नृत् इति मूलात् क्यप्-प्रत्ययेन नृत्यम् इति पदं निष्पन्नम् । पाणिनीयधातुपाठे उक्तं-नृती गात्रविक्षेपे (सूत्रम्-१११६) । अतः नृत्यशब्दस्य सामान्यार्थः गात्रविक्षेप इति । गात्रविक्षेपेण भावानाम् अभिव्यञ्जनस्य अभ्यासः आदिमजनानां व्यवहारे एव मूलभूतः आसीत्। मनुष्याः भाषासृष्टेः पूर्वं अङ्गं चालयित्वा, वन्यजीवानां प्रकृतेः च अनुकरणं कृत्वा स्वस्य भावान् प्रकाशयन्ति स्म। परन्तु तदा ते अङ्गविक्षेपाः केवलं जीवनाय सहायकाः आसन्, किञ्चिदपि शिल्पनैपुण्यं तेषु अङ्गविक्षेपेषु न दृश्यते। ततः सभ्यतायाः उन्नत्या तेषाम् अङ्गविक्षेपाणां विनियोगाः परिवर्तिताः । ते जीवनसहायकाः अङ्गविक्षेपाः क्रमेण कलारूपेण प्रसिद्धाः अभवन्। मानवसंस्कृतेः इतिहासे एषा कला एव नृत्यम् इति उच्यते।

नृत्यविषये प्राप्तेन शैल्पिक-साहित्यिक-निदर्शनेन मन्यते सिन्धुसभ्यतात् वैदिक-वैदिकोत्तर-कालेऽपि नृत्यचर्चा मानवसमाजे सुप्रचलिता आसीत्। किंतु नृत्यस्य कापि संज्ञा तदा प्रचलिता नासीत्। नाट्यशास्त्रेऽपि नृत्यविषये वहुविधा चर्चा उपलभ्यते, यद्यपि किञ्चित् नृत्यसंज्ञा न दृश्यते। प्रायः द्वितीय-पञ्चमशताब्दयोः मध्यवर्तिसमये आचार्य-नन्दिकेश्वरस्य आविर्भावः। तस्य *अभिनयदर्पनम्* इति ग्रन्थे एव सर्वप्रथमं नृत्यस्य संज्ञा प्रदत्ता। परवर्तिकाले दशरूपक-भावप्रकाशनम् इत्यादयः ग्रन्थेष्वपि नृत्यस्य विविधलक्षणं प्रदत्तम्। तथापि नृत्यस्य स्वरूपनिरूपणविषये अभिनयदर्पणोक्तलक्षणम् एव सर्वाधिकं गुरुत्वं लभ्यते।

नृत्यविषयकप्रसिद्धपुस्तकम् अभिनयदर्पणम् अस्ति । अस्मिन्नेव ग्रन्थे प्रदत्तानां तथ्यानाम् आधारीकृत्य अनेकभारतीयशास्त्रीयनृत्यानि जायते । अतः भारतीयशास्त्रीयनृत्यजगति एतत् पुस्तकम् अमूल्यम् । नमस्क्रिया-नाट्योत्पत्ति-नटनप्रयोगकाल-पुष्पाञ्जलि-चतुर्विधाभिनय-शिरोभेद-दृष्टिभेद-ग्रीवाभेद-स्थानकभेद-उत्प्लवनभेद-भ्रमरीभेद-चारिभेद-गतिभेदाः इति विविधं नृत्यविषयक-आलोचनं अस्मिन् पुस्तके समाविष्टम् । अस्य ग्रन्थस्य महत्त्वपूर्णभागः हस्तभेदः इति । अत्र आचार्यनन्दिकेश्वरेण अष्टाविंशतयः असंयुतहस्ताः, त्रयोविंशतयः संयुतहस्ताः, त्रयोदशाः नृतहस्ताः, षोडशाः देवहस्ताः, दशावतारहस्ताः, पञ्च जातिहस्ताः, एकादशाः बान्धवहस्ताः, नवग्रहहस्ताः इति हस्तमुद्रायाः विस्तृतं विवरणं प्रदत्तम्। १९१७ तमे वर्षे आनन्दकुमारस्वामी इत्यनेन विरचितः 'द-मिरर-आफ्-जेश्चर' (The Mirror of Gesture) इति ग्रन्थः कैम्ब्रिजतः (Cambridge University) प्रकाशितः, यः अभिनयदर्पणस्य आङ्गलानुवादः । भारते विदेशे च एतत् पुस्तकं समानरूपेण लोकप्रियमस्ति।

अभिनयदर्पनस्य प्रारम्भे आचार्य-नन्दिकेश्वरेण भरतादिनाट्याचार्याणां पदाङ्कं अनुसरणं कृत्वा नर्तनं नाट्यं नृत्यं नृत्तं चेति त्रिविधश्रेण्यां विभज्यते । आदौ नाट्यस्य लक्षणं प्रदत्तम् । नट् इति धातुना सह ष्यञ्-प्रत्यययोगेन नाट्यमिति पदं निष्पन्नम् । पाणिनीयधातुपाठे उक्तञ्च नट अवस्पन्दने (सूत्र-१५४५)।

अस्य अर्थनिरूपणकाले आचार्यधनिकेन अवलोकटीकायाम् उक्तं-नाट्यमिति च नट अवस्पन्दने इति नटेः किञ्चिच्चलनार्थत्वात् सात्त्विकवाहुल्यम् अत एव तत्कारिषु नटव्यपदेशः (दशरूपकम् १ ।१२) । अतः नाट्यम् इति शब्दस्य अर्थः किञ्चिच्चलनम् एव, यतः नाट्ये सात्त्विकाभिनयस्य प्राचुर्यं दृश्यते।

अभिनयदर्पणे नाट्यस्वरूपनिरुपणकाले उक्तं-नाट्यं तन्नाटकञ्चैव पूज्यं पूर्वकथायुतम् (अभिनयदर्पणम्-१५) । अतः नाट्यं नाटकमेव, एतत् प्राचीनकथावलम्ब्य विरचितं पूज्यञ्च । संस्कृतसाहित्ये नाट्यम् इति शब्देन नाटकप्रकरण-रूपकाणि नाटिकात्रोटक-उपरूपकाणि च बोध्यन्ते । किंतु सर्वाणि रूपक-उपरूपकाणि न पूर्वकथायुक्तानि । यथा भाण-प्रकरण-प्रहसनानाम् आख्यानं कविकल्पितमस्ति । तर्हि अभिनयदर्पनोक्तनाट्यलक्षणम् अव्याप्तिदोषदुष्टं वा ? अथवा नन्दिकेश्वरेण नाट्यरूपेण दशरूपकस्य प्रथमं रूपकं नाटकमिति वोध्यते ? नाट्यलक्षणेऽपि ईदृशमेव इङ्गितं प्रदत्तं-नाट्यं तन्नाटकं......... । अतः आङ्गिक-वाचिक-सात्त्विक-आहार्याभिनयैः नर्तनभङ्ग्या कस्यचित् आख्यानस्य उपस्थापनम् एव नाट्यमिति । एषा उपस्थापना अभिज्ञानशकुन्तल-उत्तररामचरितम् इति दृश्यकावेषु दृश्यते। यथा-अभिज्ञानशकुन्तलम् इति नाटके यः दुष्यन्तस्य चरित्राभिनयं करोति सः अभिनयनैपुण्येन नर्तनभङ्गा च शकुन्तलया सह प्रणयः इति विविधनाट्यदृश्यानि मञ्चस्थं करोति । (प्राचीनभारतीयनाट्यं तथा दृश्यकाव्यं नृत्यमूलकम् आसीत् ।अद्यपि दक्षिणभारतस्य केराला इति राज्यस्य कुडियाट्टम् इति दृश्यकाव्यम् प्राचीनसंस्कृतनाट्यधारायाः अनुसरणं करोति ।) नाट्यपरिवेशनकाले शिल्पी स्वाभिनयकौशलेन नाट्यचरित्रेण सह एकात्मं भवति(यथा उत्तररामचरितम् इति नाटके यः श्रीरामचन्द्रस्य चरित्राभिनयं करोति स अभिनयनैपुण्येन दर्शकान् निकषा साक्षात् श्रीरामचन्द्ररूपेण प्रतीयते। आचार्य-धनञ्जयेन अपि दशरूपके उक्तं-अवस्थानुकृतिर्नाट्यम् १ ।७) । अपि च नटे रामचन्द्रादि-नाट्यचरित्रस्य आरोपात् नाट्यं रूपकम् इति नाम्ना अभिहितं-रूपकं तत्समारोपात् (दशरूपकम् १ ।९) । नाट्यशास्त्रेऽपि उक्तं-त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् (१ ।१०७) । मानवप्रवृत्त्याः अनुकरणम् एव नाट्यं-लोकवृत्तानुकरणं नाट्यम् (१ ।११२)। आचार्य-सागरनन्दिना नाटकलक्षणरत्नकोशे उक्तम्-

**अवस्ता या तु लोकस्य सुखदुःखसमुद्भवा।**
**तस्यास्त्वभिनयः प्राज्ञैर्नाट्यमित्यभिधीयते।। (३९)**

जागतिकसुखदुःखसमुद्भूत-अवस्थायाः अभिनय एव नाट्यमिति । नाट्यस्य मुख्यतम-वैशिष्ट्यमेव एतेन दर्शकाः आनन्दं लभन्ते । एषः एव आनन्दः वस्तुतः नाट्यस्य रसास्वादनेन एव लभ्यते । एतस्मिन्नेव विषये नाट्यशास्त्रेऽपि उक्तं-यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति (नाट्यशास्त्रम्, षष्ठः अध्यायः)।

नृत् इति धातुना सह क्तप्रत्यययोगेन नृत्तम् इति पदं निष्पन्नम् । नृत्तस्य लक्षणप्रदानकाले अभिनयदर्पणे उक्तं-भावाभिनयहीनं तु नृत्तमित्यभिधीयते (अभिनयदर्पणम्-१५), अर्थात् भावहीनम् अभिनयहीनं च नर्तनं एव नृत्तम् इति। इदं नर्तनस्य विशुद्धतमं रूपम्। अस्मिन्नेव नर्तने भावः नास्ति, स्वाभाविकतया रसः अपि अनुपस्थितः । नृत्ते कोऽपि अर्थयुक्त-अङ्गविक्षेपः नास्ति । नृत्तं केवलं अर्थहीन-अङ्गविक्षेपेण सौन्दर्यं सृष्ट्वा दर्शकचित्तं विमोहितं करोति। तस्मात् सङ्गीतरत्नाकरे उक्तम्-आङ्गिक-वाचिक-सात्त्विक-आहार्यश्चेति चतुर्भिधाभिनयवर्जितं साधारणं गात्रविक्षेपमात्रं नृत्तमिति-

**गात्रविक्षेपमात्रं तु सर्वाभिनयवर्जितम्।**
**आङ्गिकोक्तप्रकारेण नृत्तं नृत्तविदो विदुः।। (७ ।२७-२८)**

दशरूपक-भावप्रकाशन-सङ्गीतरत्नाकरः इति ग्रन्थेषु नृत्तं देशी इति नाम्ना अभिहितम् । भावरसहीनस्य ईदृशस्य नृत्तस्य शृङ्खलाबद्ध-अभ्यासेन नर्तनभङ्ग्याः वहुधा संस्कारः भूयते, अपि च सा एव शिल्पी क्रमेण नृत्यं नाट्यं च परिवेशनाय योग्यतां लभते । तस्मात् नर्तने उन्नतिलाभाय नृत्तस्य प्राथमिक-अभ्यासः एकान्तः आवश्यकः । परन्तु इदमेव नृत्तं यस्मिन् तस्मिन्नेव समये न परिवेशनीयम् । नृत्तस्य प्रयोगकालविषये अभिनयदर्पणे उक्तञ्च-

**नृत्तं त्वत्र नरेन्द्राणामभिषेके महोत्सवे।**
**यात्रायां देवयात्रायां विवाहे प्रियसङ्गमे।।**
**नगराणामगाराणां प्रवेशे पुत्रजन्मनि।**
**शुभार्थिभिः प्रयोक्तव्यं मांङ्गल्यं सर्वकर्मसु।।**
**(अभिनयदर्पणम् १३-१४)**

अतः प्रतिमाविसर्जने, विवाहोत्सवे, प्रियजनेन सह मिलने, गृहप्रवेशे, नवजातकस्य आगमने च इति विविध-शुभानुष्ठाने मङ्गलवशात् नृत्तस्य प्रदर्शनं कर्तव्यम् । नाट्यशास्त्रस्य चतुर्थाध्यायेऽपि अनुरूप-वर्णना उपलभ्यते-

**प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः।**
**मङ्गल्यमिति कृत्वा च नृत्तमेतत्प्रकीर्तितम्।।**
**विवाहप्रसवावाहप्रमोदाभ्युदयादिषु।**
**विनोदकारणं चेति नृत्तमेतत्प्रवर्तितम्।। (४ ।२६९-२७०)**

**नृत्यस्य स्वरूपनिरूपणकाले अभिनयदर्पणे उक्तं-**
रसभावव्यञ्जनादियुक्तं नृत्यमितीर्यते (अभिनयदर्पणम्-१६) । एषः नर्तनस्य भावप्रधानमंशः एव । नृत्ये भावः अस्ति, अतः स्वाभाविकतया रसः अप्यस्ति । व्याञ्जना अप्यस्ति या शास्त्रीय-अङ्गविक्षेपेण प्रकाशयते । अयमेव अङ्गविक्षेपः माललयाश्रितः सविलासश्च, अतः नृत्यं न केवलं मनुष्यगणाय अपि तु देवगणाय अतीव प्रीतिप्रदायकम्। शुभङ्करविरचिते सङ्गीतदामोदरे उक्तञ्च-

**देवरुच्या प्रतीतो यस्तालमानरसाश्रयः।**
**सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः।।**
**(चतुर्थः स्तवकः)**

सङ्गीतरत्नाकरे उक्तं आहार्याभिनयवर्जितं आङ्गिक-वाचिक-सात्त्विकाभिनययुक्तं केवलं भावस्य अभिव्यञ्जक-नर्तनस्य नाम नृत्यम् इति-आङ्गिकाभिनयैरैव भावानेव व्यनक्ति यत्।। तन्नृत्यं...........(७ ।२६-२७)। परन्तु एतदेव नृत्यलक्षणं पूर्णरूपेण न दोषवर्जितम् । यदा कोऽपि नर्तकः शिवताण्डवस्तोत्रे नृत्यं परिवेशनं करोति तदा सः गात्रे कृत्रिम-व्याघ्रचर्म, मस्तके अर्धचन्द्रः, गले रुद्राक्षस्य माला इति विविध-सज्जाद्रव्यं परिधानं करोति। एते वेशाः नृत्यस्य परिपूर्णरूपेण रसास्वादने सम्यकतया सहायतां कुर्वन्ति । अतः मन्यते, नृत्ये आहार्याभिनयः अपि पूर्णरूपेण उपस्थितः । आचार्य-शारदातनयेन उक्तञ्च गीतस्य मात्रानुसारेण अङ्ग-उपाङ्ग-प्रत्यङ्गसमूहैः नृत्ये पदार्थाभिनयः भूयते । अस्मिन्नेव पदार्थाभिनयकाले नर्तकः मुखेन सङ्गीतं, हस्ताभ्यां तस्य एव सङ्गीतस्य अर्थं, नयनद्वयेन भावानुकूल-दृष्टिम्, अपि च पदविक्षेपेण तालं लयञ्च प्रदर्शनं करोति-

**आस्येनालम्बयेद् गीतं हस्तेनार्थं प्रदर्शयेत्।**
**चक्षुर्भ्यां दर्शयेद्भावं पादाभ्यां तालमादिशेत्।।**
**(अभिनयदर्पणम् ।३६)**

**अङ्गभाषायाः ईदृशः वहिःप्रकाशः अन्यस्मिन् शिल्पमाध्यमे दुर्लभः।**
वस्तुतः नृत्यम् अभिनयेन सह नृत्तस्य मिलनभूमिः । एतस्मिन् नर्तने यथा सङ्गीतस्य अर्थाभिनयः दृश्यते तथैव माललयाश्रित-अर्थहीनाः अङ्गविक्षेपा अपि दृश्यते । तस्मात् अभिनयदर्पणे उक्तं-नृत्यं गीताभिनयं भावतालयुतं भवेत् (३५)। इदमेव नृत्यं मार्गशब्देन अभिहितं-नृत्यं मार्गशब्देन प्रसिद्धं नृत्यवेदिनाम्(सङ्गीतरत्नाकरः ७ ।२७) । अभिनयदर्पणानुसारं नाट्यं नृत्यञ्च पर्वकाले तथा उत्सवे अवश्यमेव प्रदर्शनीयम्-द्रष्टव्ये नाट्यनृत्ये च पर्वकाले विशेषतः (१२) । सङ्गीतरत्नाकरे अपि अनुरूपः दृष्टान्तः उपलभ्यते-द्रष्टव्ये नाट्यनृत्ये ते पर्वकाले विशेषतः (७ ।१४)।

भरतनाट्यम् इति शास्त्रीयनृत्ये नृत्त-नृत्य-नाट्यानां उपस्थितिः परिलक्ष्यते । एतस्य नर्तनस्य मूलांशस्य षड्भागाः सन्ति-आल्लारिपु-यतिस्वरं-शब्दं-वर्णं-पदं-तिल्लानाः चेति ।

एतेषु आल्लारिपु-तिल्लाना-यतिस्वरञ्च नृत्तरूपेण, शब्दं-वर्णञ्च नृत्यरूपेण, पदं च नाट्यरूपेण अभिधीयन्ते ।

**संदर्भसूची**


1. Kālidāsa. Abhijñānaśakuntala. Chakravarty S, Editor. 7th Ed. Kolkata: Sanskrit Pustak Bhandar; 2010.
2. Nandikeśvara. Abhinayadarpaṇa. Bandyopadhyay M, editor. 1st Ed. Kolkata: Saraswata Kunja; 2010.
3. Nandikeśvara. Abhinayadarpaṇa. Ghosh M, editor. Calcutta: Firma KL Mukhopadhyaya; 1957.
4. Śāradātanaya. Bhāvaprakāśana. Yodugiri Yatiraja Swami of Melkot, Sastri Siromani KSR, Editors. Baroda: Oriental Institute; 1968.
5. Dhanañjaya. Daśarūpaka. Sastri S, Editor. Meerut: Sahitya Bhandar; 1968.
6. Pāṇini. Dhātupāṭha. Sarma K, Editor. Varanasi: The Chowkhamba Sanskrit Series Office; 1969.
7. Sāgaranandī. Nāṭakalakṣaṇaratnakośa. Shukla Sastri B, Editor. Varanasi: Chowkhamba Sanskrit Series Office; 1972.
8. Bharata Muni. Nāṭyaśāstra. Shastri M, Editor. Vol. I-II. Varanasi: Banaras Hindu University; 1971-1975.
9. Bharata Muni. Nāṭyaśāstra. Bandyopadhyay S, editor. Vol. I-IV. Kolkata: Navapatra Prakashan; 1956-1995 (Bangabda 1395).
10. Śubhaṅkara. Saṅgītadāmodara. Shastri G, Mukhopadhyaya G, Editors. Calcutta: Sanskrit College; 1882 (Śakābda).
11. Śārṅgadeva. Saṅgītaratnākara. Subrahmanya Sastri S, Editor. Vol. IV. Adyar: The Adyar Library; 1953.
12. Bhavabhūti. Uttararāmacarita. Tripathi R, Editor. Varanasi: Chaukhamba Surbharti Prakashan; 2016.
13. Dutta S. Nṛtyamudrāy Tantrer Prāsaṅgikatā Ekṭi Samīkṣā. 1st Ed. Kolkata: Sanskrit Book Depot; 2024.